॥ श्रीजिनाय नमः ॥

॥ श्रीनिगोदषट्त्रिंशिका ॥

(कर्ता–श्रीरत्नसिंहसूरिः)

उपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाळा)

वीरसंवत्—२४४५. विक्रमसंवत्—१९७५. सने—१९१९.

किं रु. ०–८–०–

☞ श्रीजैनभास्करोदय प्रिन्टिंग प्रेस. जामनगर. ☜

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

॥ अथ श्रीनिगोदषट्त्रिंशिका सटीका प्रारभ्यते ॥

(कर्ता—श्रीरत्नसिंहसूरिः)

उपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज. (जामनगरवाला)

अथ पंचमांगे एकादशशते दशमोद्देशके निगोदविचारः—लोगस्स णं भंते एगंमि आगासपएसे जहन्नयपए जीवपएसाणं, उक्कोसपए जीवपएसाणं, सव्वजीवाणं कयरे कयरे अप्पा वा बहुआ वा तुल्ला वा विसेसाहिया वा ? गोअमा सव्वत्थो लोगस्स एगंमि आगासपएसे जहन्नपए जीवपएसा, सव्वजीवा असंखिज्जगुणा, उक्कोसपए जीवपएसा विसेसाहिया इति सूत्रं वृद्धोक्ताभिः षट्त्रिंशता गाथाभिरमूभिरभिधीयते, यथा—

॥ मूलम् ॥—लोगस्सेगपएसे । जहन्नयपयंमि जियपएसाणं ॥ उक्कोसपए य तहा । सव-

जियाणं च के बहुआ ॥ १ ॥ व्याख्या—लोकाकाशस्यैकस्मिन्नभःप्रदेशे निर्विभागे जघन्यतः सूक्ष्मनिगोदादिजीवानां कतिप्रदेशा अवगाढाः स्युः? तथा उत्कृष्टपदे उत्कर्षपदे च लोकाकाशस्यैव एकस्मिन्नभःप्रदेशे निर्विभागे क्षेत्रे कतिजीवानां प्रदेशा अवगाढाः स्युः? तथा सर्वजीवानां समस्तलोकाकाशवर्तिनां सर्वभेदविभिन्नानामुत्कृष्टपदेनैकनभःप्रदेशावगाढसूक्ष्मबादरादिभेदविभिन्नजीवप्रदेशानां च के बहवः? इति सूत्रवृत्तिः. इह चतुर्दशरज्ज्वात्मकोऽपि लोकः प्रदेशगणितापेक्षयाऽसंख्यातप्रदेशात्मकोऽस्ति. एकैकनिगोदावगाहना चांगुलासंख्येयभागमात्रक्षेत्रप्रमाणा, यत्र चैको निगोदस्तत्रासंख्येया निगोदाः. अनंतजीवानां च एकं साधारणं शरीरं निगोदः, एकैकजीवश्च स्वदेशेऽसंख्यातप्रदेशात्मको लभ्यते. स च सूक्ष्मनिगोदेष्वतीवसंकुचितोंगुलासंख्येयभागमात्रक्षेत्रं असंख्यातप्रदेशात्मकं व्याप्नोति, विस्तृतस्तु बहून् बहुतरान् वा यावत्केवलिसमुद्घातावस्थायां सर्वान् लोकाकाशप्रदेशान् व्याप्नोति. ततश्च सर्वजीवराशेरपेक्षया जघन्यत एकत्र क्षेत्रे नभःप्रदेशेऽसंख्यातनिगोदांशोऽधितिष्ठति. कतिसर्वजीवा जघन्यपदे च कतिप्रदेशा अवगाढाः स्युः? उत्कृष्टतोऽपि कतीति परमार्थतो रा-

शित्रयस्य परस्परमल्पबहुत्वे प्रश्नः. ॥ १ ॥ उत्तरमाह—

॥ मूलम् ॥—थोवा जहन्नयपए । जियप्पएसा जिया असंखगुणा ॥ उक्कोसपयपएसा । उ विसेसाहिया भणिया ॥ २ ॥ व्याख्या—एकत्र नभःप्रदेशे जघन्यपदे जीवप्रदेशाः सर्वजीवराशेरपेक्षया स्तोकाः, असंख्येयतमभागवर्तित्वात्, जघन्यपदे च जीवप्रदेशापेक्षया सर्वजीवानामसंख्यातगुणत्वात्. उत्कृष्टपदे त्वेकस्मिन्नभःप्रदेशे जीवप्रदेशास्ततः सर्वजीवराशेरपेक्षया विशेषाधिका इति. ॥ २ ॥ अथ जघन्यपदमुत्कृष्टपदं चोच्यते—

॥ मूलम् ॥—तह्व पुण जहन्नयपयं । लोयंते जह्व फासणा तिदिसिं.॥ ह्वद्दिसिमुक्कोसपयं । समह्वगोलंमि नन्नह्व ॥ ३ ॥ व्याख्या—तत्र तयोर्जघन्येतरपदयोर्जघन्यपदं लोकांते निष्कुटकोणरूपे भवति. ' जह्वित्ति ' यत्र गोलके स्पर्शना अपरापरगोलकारंभकनिगोददेशैस्तिसृष्वेव दिक्षु भवति शेषाणां दिशामलोकेनावृत्तत्वात्. सा च स्पर्शना खंभगोलक एव भवतीति भावः ' ह्वद्दिसिंति ' यत्र पुनर्गोलके षट्स्वपि दिक्षु अपरापरगोलकारंभकनिगोदराशिदेशैः स्पर्शना भवति तत्रोत्कृष्टपदं भवति. तच्च समस्तगोलके परिपूर्णगोलके भवतीत्य-

र्थः. नान्यत्र खंभगोलके न भवतीति भावः. संपूर्णगोलकश्च लोकमध्य एव स्यात्, न त्व-लोकसमीपे इति. ॥ ३ ॥ अथ परवचनमाशंकमान आह—

॥ मूलम् ॥—उक्कोसमसंखगुणं । जहन्न या उ पयं हवइ किं नु ॥ ननु तिदिसिफुस-णाउ । छद्दिसि फुसणा भवे दुगुणा ॥ ४ ॥ व्याख्या—उत्कृष्टपदमसंख्यातगुणं जघन्यपदैक-नभःप्रदेशावगाढजीवराशेरपेक्षया किं नु कथं न भवति? न भवतीत्यर्थः. कस्मादेवमित्याह —ननु निश्चितं अक्षमायां वा ननुशब्दः. त्रिदिक्स्पर्शनायाः सकाशात् षट्दिक्स्पर्शना भ-वेत् द्विगुणा, त्रिकस्य द्विकेन गुणेन षण्णामेव भावात् इति. इह च काकुपाठाद्धेतुत्वं प्रती-यते इत्यतो द्विगुणमेवोत्कृष्टपदं स्यात्, असंख्यातगुणं च तदिष्यते जघन्यपदैकनभःप्रदेशा-श्रितजीव प्रदेशराश्यपेक्षयाऽसंख्यातगुणं, सर्वजीवेभ्यो विशेषाधिकजीवप्रदेशोपेतत्वात्तस्ये-ति. ॥ ४ ॥ इहोत्तरं—

॥ मूलम् ॥—जीवा जहन्नपयए । निगोअमित्तावगाहणा फुसणा ॥ फुसणाऽसंखगुण-त्ता । उक्कोसपए असंखगुणा ॥ ५ ॥ व्याख्या—एकस्मिन्नभःप्रदेशे जघन्यतो जीवप्रदेशाः

स्तोकाः, कुत इत्याह—' निगोयमित्तावगाहणा फुसणत्ति ' निगोदमात्रे अंगुलासंख्येयजागरूपे क्षेत्रेऽवगाहना येषां ते निगोदमात्रक्षेत्रावगाहना. यावत्सु येष्वेवाकाशप्रदेशेष्वेको हि निगोदोऽवगाढस्तावत्सु तेष्वेव चापरनजःप्रदेशस्पर्शपरिहारेण ये निगोदा अवगाढास्ते एकावगाहना इत्यर्थः. तैरेव च यत्स्पर्शनमवगाहनं जघन्यपदस्य तन्निगोदमात्रावगाहनस्पर्शनं, तस्मात् खंधगोलकनिष्पादकनिगोदैस्तस्यासंस्पर्शनात् इत्यर्थः. भूम्यासन्नापवरकमध्यकोणांतिमप्रदेशसदृशो हि जघन्यपदाख्यः प्रदेशः. तं चालोकसंबंधादेकावगाहना एव निगोदाः स्पृशंति, न तु खंधगोलकनिष्पादकनिगोदाः, प्रदेशोपरिवृद्धिहानिन्यां तुल्यावगाहनानामपि निगोदानां तत्रानुपलभ्यमानत्वात्. तत्र किल कल्पनया जघन्यपदं जीवशतं स्पृशति, परमार्थतस्त्वेकोऽपि निगोदोऽनंतजीवाधिष्ठितः, यत्र चैको निगोदस्तत्रैकावगाहना असंख्येया इति. तस्य च कल्पनाकल्पितस्य जीवशतस्य प्रत्येकं कल्पनयैव प्रदेशलक्षं तत्रावगाढमिति, परमार्थतस्तु समस्तलोकाकाशप्रदेशराशितुल्यप्रदेश एकैकोऽपि जीवोऽसंख्येयान् प्रदेशानवगाहते इति. एवं च काल्पनिकप्रदेशलक्षगुणने जघन्यपदे कोटीजीवप्रदेशानामवगाढेत्येवं

स्तोकास्तत्र जीवप्रदेशा इति. अथोत्कृष्टपदजीवप्रदेशप्रमाणमुच्यते—'फुसणाऽसंखगुणत्तत्ति' स्पर्शनाया उत्कृष्टपदे पूर्णगोलकनिष्पादकनिगोदैः स्पर्शनाया यदसंख्यातगुणत्वं जघन्यपदापेक्षया तत्तथा, तस्माद्धेतोरुत्कृष्टपदेऽसंख्यातगुणा जीवप्रदेशा जघन्यपदापेक्षया भवंति. उत्कृष्टपदं हि संपूर्णगोलकनिगोदैरेकावगाहनैरसंख्येयैस्तथोत्कृष्टपदाविमोचनेन प्रथमनिगोदावगाहनापेक्षया एकैकप्रदेशश्रेणिपरिहारिभिः प्रत्येकमसंख्येयैरेव स्पृष्टं, तच्च किल कल्पनया कोटीसहस्रेण जीवानां स्पृशते तत्र च प्रत्येकं जीवप्रदेशलक्षस्यावगाहनात्, जीवप्रदेशानां च दशकोटीकोट्योऽवगाढाः स्युरित्येवमुत्कृष्टपदे तेऽसंख्येयगुणा भावनीया इति. ॥ ॥ ५ ॥ अथ गोलकप्ररूपणायाह—

॥ मूलम् ॥—उक्कोसपयममुत्तुं । निगोयउगाहणाइ सव्वत्तो ॥ निप्फाइज्जइ गोलो । पएसपरिवुड्ढिहाणीहिं ॥ ६ ॥ व्याख्या—उत्कृष्टपदं गोलकस्थितबहुजीवप्रदेशस्पृष्टनभःप्रदेशरूपं विवक्षितप्रदेशममुंचद्भिर्निगोदावगाहनाया एकतः सर्वतः सर्वासु दिक्षु निगोदांतराणि स्थापयद्भिर्निष्पाद्यते गोलः. कथं प्रदेशपरिवृद्धिहानिभ्यां कांश्चित्प्रदेशान् विवक्षितावगाह-

नाया आक्रमद्भिः कांश्चिद्भिमुंचद्भिरित्यर्थः. अयमत्रिप्रायः— षु विवक्षितेष्वंगुलासंख्येयभागवर्तिष्वसंख्यातेष्वाकाशप्रदेशेष्वेको निगोदोऽवगाहते, तेष्वेवान्येऽसंख्याता निगादा अवगाहंते. तथा विवक्षितनिगोदावगाहनापेक्षयैवापरे निगोदाः कांश्चित्प्रदेशान् परिहृत्य कांश्चिच्च प्रदेशानभिव्याप्यापरनभःप्रदेशानपि व्याप्नुवंतीत्यर्थः. एवमेकगोलकनिष्पतिः ॥ ६ ॥ गोलकांतरकल्पनायाह—

॥ मूलम् ॥—तत्तो चिय गोलाउं । उक्कोसपयं मुइत्तु जो अन्नो ॥ होइ निगोउं तंमिवि । अन्नो निप्फज्जइ गोलो ॥ ७ ॥ व्याख्या—तमेवोक्तलक्षणं गोलकमाश्रित्यान्यो निष्पद्यते गोलः, कथं उत्कृष्टपदं प्राक्तनगोलकसंबंधि विमुच्य योऽन्यो भवति निगोदस्तस्मिन्नुत्कृष्टपदकल्पनेनेति. अयमाशयः—प्रागुत्कृष्टपदमाश्रित्य विवक्षितनिगोदावगाहनायां यानि यानि प्रदेशपरिवृद्धिहानिन्यां निगोदांतराणि स्थापितानि तेष्वेकतरमपि निगोदमाश्रित्य निगोदांतरस्थापनेन गोलकांतरं निष्पद्यत इति. ॥ ७ ॥ तथा च सति यत्स्यात्तदाह—

॥मूलम्॥—एवं निगोअमित्ते । खित्ते गोलस्स होइ निप्फत्ति ॥ एव निप्फज्जंते । लोगे गोला असं-

खिज्जा ॥ ८ ॥ व्याख्या—एवमुक्तक्रमेण प्रतिनिगोदं निगोदांतरस्थापनारूपेण निगोदमात्रे क्षेत्रे विवक्षितविविक्तैकैकनिगोदावगाहनास्वरूपे आकाशखंडे गोलकस्य भवति निष्पत्तिः, विवक्षितनिगोदावगाहनातिरिक्तनिगोददेशानां गोलकांतरानुप्रदेशात्. एवं च निष्पद्यंते लोके गोला असंख्येयाः, सकलस्यापि लोकाकाशस्य निगोदकदंबकावरुद्धत्वात्, निगोदावगाहनायाश्चांगुलासंख्येयभागरूपत्वात्, प्रतिनिगोदावगोहनं च गोलकनिष्पत्तेरिति. ॥ ८ ॥ अथ किमिदमेव प्रतिगोलकं यदुत्कृष्टपदं तदेवेह ग्राह्यं, उतान्यदिति? अस्यामाशंकायामाह—

॥ मूलम् ॥—ववहारनएण इमं । उक्कोसपयावि इत्तिया चेव ॥ जं पुण उक्कोसपयं । निच्छईयं होइ तं वुच्चं ॥ ए ॥ व्याख्या—व्यवहारनयेन सामान्येनेदमनंतरव्यावर्णितस्वरूपमुत्कृष्टपदमुक्तं, काका चेदमध्येयं, अनुक्तस्यापि किमुशब्दस्य गम्यमानत्वात्, ततश्च किमिदमुत्कृष्टपदं ग्राह्यं ? अपि तु न ग्राह्यमेवेति तात्पर्यं, कुतः? 'उक्कोसपयावि इत्तिया चेवत्ति' न केवलं गोलका असंख्येयाः, उत्कृष्टपदान्यपि प्रतिपरिपूर्णगोलकस्पर्शनाप्ररूपितानि एतावंत्येवासंख्येयान्येन भवंति. यस्मात्ततो न नियतमुत्कृष्टपदं, किं च तस्मान्निःकुटासन्नत्रिदि-

क्स्पर्शिखंरुगोलकान् विहाय शेषगोलकानां षट्दिक्स्पर्शिनां न सर्वेषामपि समानगोलकांतरैः समानस्पर्शनयुक्तत्वादिति. यत्पुनरुत्कृष्टपदं नैश्चयिकं निश्चयनयसंमतं भवति, सर्वोत्कर्षयोगाद्यदिह ग्राह्यं तद्धृदयेऽनंतरगाथया ॥ ए ॥ तदेवाह—

॥ मूलम् ॥—बायरनिगोअविग्गह—गईआई जत्त समहिया अन्ने ॥ गोला हुज्ज सुबहुआ । निईयपयं तदुक्कोसं ॥ १० ॥ व्याख्या—बादराश्च ते निगोदाश्च बादरनिगोदाः कंदादयः, ते च सूक्ष्मबादरनिगोदसंबंधिविग्रहगतिकाश्च, आदिशब्दादविग्रहगतयोऽपि, यत्रोत्कृष्टपदे समधिकाः सूक्ष्मनिगोदगोलकेभ्यः पूर्वोक्तस्वरूपेभ्य उत्कृष्टपदवर्तिभ्योऽधिका अन्ये निगोदसूक्ष्मगोलकेभ्योऽपरेगोलका भवेयुः सुबहवो नैश्चयिकपदं तदुत्कृष्टं, अयमभिप्रायः—यत्र कापि सूक्ष्मा निगोदसंदोहनिष्पन्नाः परिपूर्णगोलकास्तत्र यदि बादरनिगोदा अप्यवगाहंते, तत्र च यदि सूक्ष्मनिगोदजीवा बादरनिगोदजीवाश्च सजातीयेषु विजातीयेषु वा बादरनिगोदांतरेपूत्पित्सवोऽपरेऽपि पृथिवीकायादयो भवांतरे संचरिष्णवो विग्रहगत्या-ऋजुगत्या वा संचरमाणाः सूक्ष्मपृथिवीकायादयस्तु तत्रस्था वाऽगाहंते, तदा च: निश्चयनय-

संमतमुत्कृष्टपदमिति. बादरनिगोदा हि निराधारा न संभवंति, ततः पृथिव्यादिष्वेव स्थानेषु स्वरूपतो भवंति, न सूक्ष्मनिगोदवत्सर्वत्रेत्यतो यत्र क्वचित्ते बादरनिगोदादयो भवंति तदुत्कृष्टपदं तात्त्विकमिति भावः. ॥ १० ॥ एतदेव दर्शयन्नाह—

॥ मूलम् ॥—इहरा पडुच्च सुहमे । बहुतुल्ला पायसो सगलगोला ॥ तो बायराइगहणं । कीरइ उक्कोसयपयंमि ॥ ११ ॥ व्याख्या—'इहरत्ति' इतरथा बादरनिगोदाश्रयणंविना सूक्ष्मनिगोदान् प्रतीत्य बहुतुल्या निगोदसंख्यया समाना भवंति, प्रायोग्रहणमेकादिना न्यूनाधिकत्वे व्यभिचारपरिहारार्थं. के एते इत्याह—सकलगोला लोकमध्यवर्तिनः संपूर्णगोलाः, न तु लोकांतवर्तिनः खंडगोलाः, अतो न नियतं किंचिदुत्कृष्टपदं लभ्येत. यत एवं ततो बादरादिग्रहणं क्रियते, अयमाशयः—अंगुलासंख्येयभागमात्रमसंख्याताकाशप्रदेशपरिमाणं क्षेत्रमवगाह्य एकः सूक्ष्मनिगोदोऽवतिष्ठते, अन्येऽप्यसंख्याताः सूक्ष्मनिगोदास्तस्मिंस्तावति क्षेत्रे व्यवतिष्ठंते तत्र सूक्ष्मैकनिगोदावगाहापेक्षया षट्स्वपि दिक्षु क्षेत्रप्रदेशपरिवृद्धिहानिभ्यां येऽपरेऽसंख्यातनिगोदात्मका असंख्येयगोलका यावंतो विवक्षितसूक्ष्मनिगोद-

नुवमवगाहंते, तत्रैव च यदि बादरनिगोदेज्यः सूक्ष्मेषु बादरेषु वा निगोदेषूत्पित्सवः सूक्ष्मनिगोदेज्यो बादरेषु सूक्ष्मेषु वा निगोदेषूत्पित्सवो विग्रहगत्या ऋजुगत्या वा संचरमाणाः सूक्ष्मपृथिवीकायादयश्च तत्रस्था वा नवांतरे विग्रहगत्या ऋजुतया वा संचरमाणा विवक्षितनिगोदावगाहमवगाहंते, तदुत्कृष्टपदं तात्विकमिति नावः. ॥ ११ ॥ अथ गोलकादीनां प्रमाणमाह—

॥ मूलम् ॥—गोला य असंखिज्जा । हुंति निउंया असंखया गोला ॥ इक्किक्को य निगोउ । अणंतजीवो मुणेयव्वो ॥ १२ ॥ व्याख्या—गोला असंख्याता नवंति, सकलेऽपि लोकाकाशे तेषामवस्थानात्, एकैकस्मिंश्च गोले निगोदाः साधारणशरीरिणोऽसंख्याता नवंति, एकावगाहनानामसंख्यातानां निगोदानामेव गोलक इति व्यपदेशात्. एकैकस्मिंश्चनिगोदेऽनंता जीवा ज्ञातव्याः, एतच्चानंतत्वं सिद्धानंतकादनंतगुणितं ज्ञातव्यं, शास्त्रांतरेष्वेकस्य निगोदस्यानंतनागो उ सिद्धिगउ इति नणनात्. ॥१२॥ अथ जीवप्रदेशपरिमाणप्ररूपणपूर्वकं निगोदादीनामवगाहनामानमभिधित्सुराह—

॥ मूलम् ॥—लोगस्स य जीवस्स य । हुंति पएसा असंखया तुल्ला ॥ अंगुलअसंखभागो । निगोयजियगोलगोगाहो ॥ १३ ॥ व्याख्या—लोकजीवयोः प्रत्येकमसंख्याताः प्रदेशा भवंति, ते च परस्परेण तुल्याः, यावंतश्चतुर्दशरज्ज्वात्मकस्य समस्तलोकाकाशस्य प्रदेशास्तावंत एकजीवस्य निजप्रदेशाः, न न्यूनाधिकाः, केवलिसमुद्घातावस्थायां केवलिना निजप्रदेशैः समस्तलोकाकाशपूरणात् तुल्यतेत्यर्थः. एषां च संकोचविशेषादंगुलासंख्येयभागो निगोदस्य, तज्जीवस्य गोलकस्य चावगाहनेति, निगोदादिसमावगाहना ॥ १३ ॥ तामेव समर्थयन्नाह—

॥ मूलम् ॥—जंमि जिउ तंमेव । निगोउवंमि चेव गोलोवि ॥ निप्फजइ जं खित्ते । तो ते तुल्लावगाहणया ॥ १४ ॥ व्याख्या—यस्मिन् क्षेत्रेंगुलासंख्येयभागरूपेऽसंख्यातनभःप्रदेशात्मके जीवोऽवगाहते, तस्मिन्नेव निगोदे निगोदमभिव्याप्य जीवस्यावस्थानात्. तोत्ति तदनंतरं तस्मिन्नेव गोलोऽपि निष्पद्यते, आस्ते विवक्षितनिगोदावगाहनातोऽतिरिक्तशेषनिगोदावग्राहना गोलकांतरप्रवेशेन निगोदमात्रगोलकावगाहनेति. अयमाशयः—येषु यावत्सु

नन्नःप्रदेशेष्वेको निगोदोऽवगाढस्तेषु तावत्स्वेवापरेऽप्यसंख्येया निगोदाः सूक्ष्मपरिणामतयावगाहंते. एकैकस्मिंश्च निगोदेऽनंता जीवाः संति, एकैकश्च जीवो विवक्षितनिगोदप्रदेशाननिव्याप्य तिष्ठति, तेषां चैकावगाहनानामसंख्यातानां निगोदानां गोलक इति संज्ञा, तस्य गोलकस्यैकैकप्रदेशश्रेणिं मुंचंतोऽपरापरप्रदेशश्रेणिं च व्याप्नुवंतः षट्स्वपि दिक्षु येऽपरे प्रत्यवगाहनमसंख्येया निगोदास्तेषामपि यावानवगाहनाभागो विवक्षितगोलकस्यासीत् तावान् स एव गोलकः, उद्धरितस्त्ववगाहनाभागो गोलकांतरेषु प्रविशतीति. आयातमेकजीवस्य निगोदस्य गोलकस्य समावगाहनेति. ॥ १४ ॥ अथ जीवाद्यवगाहनासमतासामर्थ्येन यदेकत्र प्रदेशे जीवप्रदेशमानं भवति, तद्विभणिषुस्तत्प्रस्तावनार्थं प्रश्नं कारयन्नाह —

॥ मूलम् ॥—उक्कोसपयपएसे । किमेगजीवप्पएसरासिस्स ॥ हुज्जेगनिग्गोयस्स व । गोलस्स व किं समोगाढं ॥ १५ ॥ व्याख्या—उत्कर्षत एकस्मिन्नभःप्रदेशे एकजीवप्रदेशराशेर्निगोदस्य गोलकस्य च किं किं समवगाढं भवेत्? अयं प्रश्नार्थः—लोकाकाशप्रदेशराशीतुल्यनिजप्रदेश आत्मा यदा संकोच्य निजप्रदेशान्निगोदमात्रेऽवगाहते, तदैकैकस्मिन्न-

नःप्रदेशे कतिजीवप्रदेशाः स्युरिति, एवं निगोदगोलकयोरपि प्रश्नार्थो ज्ञेयः ॥ १५ ॥ तत्र जीवमाश्रित्योत्तरं—

॥ मूलम् ॥—जीवस्स लोगमित्तस्स । सुहुमउगाहणावगाढस्स ॥ इक्कंमि पएसे । हुंति पएसा असंखिज्जा ॥ १६ ॥ व्याख्या—जीवस्य समस्तलोकाकाशप्रदेशसमाननिजप्रदेशस्य सूक्ष्मावगाहनयावगाढस्यैकैकनभःप्रदेशेऽसंख्याता जीवप्रदेशा भवंति. अयमर्थः—सूक्ष्मनामकर्मोदयेन जीवोंगुलासंख्येयभागरूपं निगोदमात्रं क्षेत्रमवगाहते, तच्चासंख्यातनभःप्रदेशात्मकं, समग्रलोकेऽप्यसंख्येया नभःप्रदेशाः, असंख्यातस्यासंख्यातभेदत्वात्. तत एकस्मिन्निगोदावगाढनभःप्रदेशे एकजीवस्यासंख्येयाः स्वप्रदेशा इति, ते च किल कल्पनया कोटीशतसंख्यस्य जीवप्रदेशराशेः प्रदेशदशसहस्रस्वरूपावगाहनया भागे हृते लभ्यमाना भवंति. ॥ १६ ॥ अथ निगोदमाश्रित्याह—

॥ मूलम् ॥—लोगस्स हिए भागे । निगोअउगाहणाइ जं लद्धं ॥ उक्कोसपए तिगयं । इत्तियमिक्किक्कजीवाउं ॥ १७ ॥ व्याख्या—निगोदावगाहनया लोकस्य भागे हृते यल्लब्धमे-

तावदुत्कृष्टपदेतिगतमवगाढं, निगोदसंबद्धादेकैकजीवादयमर्थः--असंख्यातप्रदेशोऽपि लोकः किल प्रदेशकोटीशतमानः कल्प्यते, एकनिगोदावगाहना च प्रदेशादशसहस्रीमाना, ततश्च कल्पितलोकप्रदेशराशेः कल्पितनिगोदावगाहनाभागे हृते लब्धं लभ्यते, तच्चानंतजीवात्मकस्य निगोदस्य संबंधिन एकैकजीवस्य उत्कर्षत एकस्मिन्नभःप्रदेशेऽवगाढमिति ज्ञातव्यं. अनेन निगोदसत्कमुत्कृष्टपदे यदवगाढं तद्दर्शितं. ॥ १७ ॥ अथ गोलकसत्कं यत्तत्रावगाढं तद्दर्शयति--

॥ मूलम् ॥—एवं दव्वट्ठाए । सव्वेसिं इक्कगोलजीवाणं ॥ उक्कोसपयमइगया । हुंति पएसा असंखिज्जा ॥ १८ ॥ व्याख्या—यथा निगोदजीवेभ्योऽसंख्येयगुणास्तत्प्रदेशा उत्कृष्टपदेऽतिगताः, एवं द्रव्यार्थतया, न तु प्रदेशार्थतया, ' सव्वेसिंति ' सर्वेभ्यः ' एग गोल जीवाणंति ' एकगोलगतजीवद्रव्येभ्यः सकाशा उत्कृष्टपदमतिगता भवंति, प्रदेशा असंख्यातगुणाः, इह किलानंतजीवोऽपि निगोदः कल्पनया लब्धजीवः, गोलकश्चासंख्यातनिगोदोऽपि कल्पनया लब्धनिगोदः, ततस्तस्य लब्धस्य लब्धगुणने कोटीसहस्रसंख्याः कल्पनया जीवा भ-

वंति. तत्प्रदेशानां च लक्षं लक्षमुत्कृष्टपदेऽतिगतं, अतश्चैकगोलकसंख्याया लक्षगुणने कोटीकोटीदशकसंख्या एकत्र प्रदेशे कल्पनया जीवप्रदेशा भवंति. गोलजीवेभ्यः सकाशादेकत्र प्रदेशेऽसंख्येयगुणा जीवप्रदेशा भवंति ॥ १८ ॥ इत्युक्तमथ तत्र गुणकारराशेः परिमाणनिर्णयार्थमुच्यते—

॥ मूलम् ॥—तं पुण केवईएणं । गुणियमसंखिज्जाये भविज्जाहि. ॥ भन्नइ दव्वट्ठाए । जावईया सव्वगोलत्ति ॥ १९ ॥ व्याख्या—तत्पुनरनंतरोक्तमुत्कृष्टपदातिगतजीवप्रदेशराशिसंबंधि कियता किंपरिमाणेनासंख्येयराशिना गुणितं सत् ' असंखिज्जयत्ति ' असंख्येयकमसंख्यातगुणनाद्वासंख्यातं भवेत्स्यादिति भण्यते, अत्रोत्तरं—द्रव्यार्थतया, न तु प्रदेशार्थतया यावंतः सर्वगोलाः सकललोकगोलकास्तावतेति गम्यं, स चोत्कृष्टपदगतैकजीवप्रदेशराशिर्मंतव्यः, सकलगोलानां तत्तुल्यत्वादिति. ॥ १९ ॥

॥ मूलम् ॥—किं कारणमोगाहण—तुल्लत्ता जियनिगोअगोलाणं ॥ गोला उक्कोसपए । इगजियपएसेवि तो तुल्ला ॥ २० ॥ व्याख्या—' किं कारणत्ति ' कस्मात्कारणाद्यावंतः

सर्वगोलास्तावंत एवोत्कृष्टपदगतैकजीवप्रदेशा इति प्रश्नः, अत्रोत्तरं—अवगाहनातुल्यत्वात्, केषामित्याह—जीवनिगोदगोलानां, अवगाहनातुल्यत्वं चैषामंगुलासंख्येयभागमात्रावगाहित्वादिति. यस्मादेवं 'तत्ति' तस्माद्गोलाः सकललोकसंबंधिन उत्कृष्टपदे ये एकस्य जीवस्य प्रदेशास्ते तथा तैरुत्कृष्टपदैकजीवप्रदेशैस्तुल्या भवंति. ॥ २० ॥ एतस्यैव भावनार्थमुच्यते—

॥ मूलम् ॥—गोलेहिं हिए लोगे । आगच्छइ जं तमेगजीवस्स ॥ उक्कोसपयगयपएस—रासितुल्लं हवइ जम्हा ॥ २१ ॥ व्याख्या—गोलैर्गोलावगाहनाप्रदेशैः कल्पनया दशसहस्रसंख्यैर्हृते विभक्ते हृतभागे इत्यर्थः, लोके लोकप्रदेशराशौ कल्पनयैककोटीशतप्रमाणे आगच्छति लभ्यते यत्सर्वगोलकसंख्यास्थानं कल्पनया लब्धमित्यर्थः. तदेकजीवसंबधिना पूर्वोक्तप्रकारतो लब्धप्रमाणेनैव कल्पनया उत्कृष्टपदगतप्रदेशराशिना तुल्यं भवति यस्मात् तस्माद्गोला उत्कृष्टपदैकजीवप्रदेशैस्तुल्या भवेतीति प्रकृतमेवेति. ॥ २१ ॥ एवं गोलकानामुत्कृष्टपदगतैकजीवप्रदेशानां च समार्थितं, पुनस्तदेव प्रकारांतरेण समर्थयति—

॥ मूलम् ॥—अहवा लोगपएसे । इक्किके हवइ गोलमिक्किकं ॥ एवं च उक्कोसपए। ए-

गजियपएसेसु मायंति ॥ २२ ॥ व्याख्या—अथवा लोकस्यैव प्रदेशे एकैकस्मिन् स्थापय निधेहि विवक्षितगोलमेकैकं, ततश्च एवमुक्तक्रमस्थापने उत्कृष्टपदे ये एकजीवप्रदेशास्ते तथा तेषु तत्परिमाणेष्वाकाशप्रदेशेष्वित्यर्थः, मांति गोला इति गम्यं. यावंत उत्कृष्टपदैकजीवप्रदेशास्तावंतो गोलका अपि भवंतीत्यर्थः. ते च किल कल्पनया लक्ष्यमाना उक्तेऽपीति ॥२२॥ अथ सर्वजीवेभ्य उत्कृष्टपदजीवप्रदेशा विशेषाधिका इति विभणिषुस्तेषां सर्वजीवानां च तावत्समतामाह—

॥ मूलम् ॥—गोलो जीवो य समा । पएसउं जं च सव्वजीवापि ॥ हुंति समोगाहणया । मज्झिमउंगाहणं पप्प ॥ २३ ॥ व्याख्या—गोलको जीवश्च समौ, प्रदेशतोऽवगाहनाप्रदेशानाश्रित्य, कल्पनया द्वयोरपि प्रदेशदशसहस्रावगाढत्वात्, ‘ जंचत्ति ’ यस्माच्च सर्वजीवा अपि सूक्ष्मा भवंति समावगाहनकाः, मध्यमावगाहनामाश्रित्य कल्पनया हि जघन्यावगाहना पंचप्रदेशसहस्राणि, उत्कृष्टा तु पंचदश, द्वयोश्च मीलनेनार्धिकरणेन च दशसहस्राणि मध्यमा भवति. ॥ २३ ॥

॥ मूलम् ॥—तेण फुसं चिय सिद्धं । एगपएसंमि जे जियपएसा ॥ ते सव्वजीवतुल्ला । सुणसु पुणो जह विसेसहिया ॥ २४ ॥ व्याख्या—इह किलासङ्ख्यावस्थापनया कोटीशतसंख्यप्रदेशस्य जीवस्य प्रदेशदशसहस्रावगाढस्य प्रतिप्रदेशं प्रदेशलक्षं भवति. तच्च पूर्वोक्तप्रकारतो निगोदवर्तिना जीवलक्षेण गुणितं कोटिसहस्रं भवति. पुनरपि च तदेकगोलकवर्तिना निगोदलक्षेण गुणितं कोटीकोटीदशकप्रमाणं भवति. जीवप्रमाणमप्येतदेव. कोटी शतसंख्यप्रदेशे लोके दशसहस्रावगाहिनां लक्षं भवति गोलानां, प्रतिगोलकं च निगोदलक्षकल्पनान्निगोदानां कोटीसहस्रं भवति, प्रतिनिगोदं च जीवलक्षकल्पनात्सर्वजीवानां कोटीकोटीदशकं भवति. ।२४। अथ सर्वजीवेभ्य उत्कृष्टपदगतजीवप्रदेशा विशेषाधिका इति दर्श्यते.

॥ मूलम् ॥—जं संति केइ खंधा । गोला लोगंतवत्तिणो अन्ने ॥ बादरनिग्गहिएहिं । उक्कोसपयं जं मज्झहिअं ॥ २५ ॥ व्याख्या—यस्माद्भियंते केचित्स्कंधा गोला लोकांतवर्तिनः, ' अन्नेत्ति ' पूर्णगोलकेभ्योऽपरे, अतो जीवराशिः कल्पनया कोटीकोटीदशकरूप ऊनो भवति, पूर्णगोलकतायामेव तस्य यथोक्तस्य भावात्. ततश्च येन जीवराशिना खंधगो-

लाः पूर्णीभूताः, स सर्वजीवराशेरपनीयते, असद्भूतत्वात्तस्य, स च किल कल्पनया कोटीशतमानः, तत्र चापनीते सर्वजीवराशिः स्तोकतरो भवति, उत्कृष्टपदं तु यथोक्तप्रमाणमेवेति, ततस्ततो विशेषाधिकं भवति, समता पुनः खंमुगोलकानां पूर्णताविवक्षणादुक्तेति. तथा बादरविग्रहगतिकैश्च बादरनिगोदादिजीवप्रदेशैश्च उत्कृष्टपदं यद्यस्मात् सर्वजीवराशेरन्यधिकं, ततः सर्वजीवेभ्य उत्कृष्टपदजीवप्रदेशा विशेषाधिका भवंति. इयमत्र भावना—बादरविग्रहगतिकादिनामनंतानां जीवानां सूक्ष्मजीवासंख्येयभागवर्तिनां कल्पनया कोटीप्रायसंख्यानां पूर्वोक्तसर्वजीवराशिप्रमाणे प्रक्षेपेण समताप्राप्तावपि तस्य बादरादिजीवराशेः कोटीप्रायसंख्यस्य मध्यादुत्कृष्टतोऽसंख्येयभागस्य कल्पनया शतसंख्यस्य विवक्षितसूक्ष्मगोलकावगाहनायामवगाहनात्, एकैकस्मिंश्च प्रदेशे प्रत्येकं जीवप्रदेशलक्षस्यावगाढत्वात्, लक्षस्य च शतगुणत्वेन कोटीप्रमाणत्वात्, तस्माच्चोत्कृष्टपदे प्रक्षेपात्, पूर्वोक्तमुत्कृष्टपदजीवप्रदेशमानं कोट्याधिकं भवति, ॥ २५ ॥ यस्मादेवं—

॥ मूलम् ॥—तम्हा सव्वेहिंतो । सव्वेहिंतो फुसं गहेयव्वं ॥ उक्कोसपहपएसा । हुंति वि-

सेसाहिया नियमा ॥ २६ ॥ व्याख्या—इदमेव प्रकारांतरेण नाव्यते.

॥ मूलम् ॥—अहवा जिणबहुसमा । सुहुमा लोएवगाहणाए य ॥ तेणिक्किक्कं जीवं । बुड्ढीए विरह्वए लोए ॥ २७ ॥ व्याख्या—यतो बहुसमाः प्रायेण जीवसंख्याया कल्पनयैकैकावगाहनायां जीवकोटीसहस्रस्यावस्थानात्, खंरुगोलकैर्व्यनिचारपरिहारार्थं चेह बहुग्रहणं, सूक्ष्माः सूक्ष्मनिगोदगोलकाः कल्पनया लक्षकल्पाः, लोके चतुर्दशरज्ज्वात्मके तथावगाहनया च समाः, कल्पनया दशसु प्रदेशसहस्रेष्ववगाढत्वात्, तस्मादेकप्रदेशावगाढजीवप्रदेशानां च समतापरिज्ञानार्थमेकैकं ' विरह्वएत्ति ' केवलिसमुद्घातगत्या विस्तारयेत् लोके, अयमत्र नावनार्थः—यावंतो गोलकस्य एकत्र प्रदेशे जीवप्रदेशा नवंति, कल्पनया कोटीकोटीदशकप्रमाणास्तावंत एव विस्तारितेषु जीवेषु लोकस्यैकत्र प्रदेशे नवंति. सर्वजीवा अप्येतत्समाना एवेति. ॥ २७ ॥ अत एवाह—

॥ मूलम् ॥—एवंपि समा जीवा । एगपएसगयजीयपएसेहिं ॥ बायरबाहुल्ला पुण । हुंति पएसा विसेसहिआ ॥ २८ ॥ व्याख्या—एवमपि न केवलं ' गोलो जीवो अ समा '

इत्यादिना पूर्वोक्तन्यायेन समा जीवा एकप्रदेशगतैर्जीवप्रदेशैरिति. उत्तरार्धस्य भावना प्राग्वदवसेया इति. ॥ २८ ॥ अथ पूर्वोक्तराशीनां निदर्शनान्यभिधित्सुः प्रस्तावयन्नाह—

॥ मूलम् ॥—तेसिं पुण रासीणं । निदरिसणमिणं भणामि पच्चक्खं ॥ सुहगहणगाहणट्ठं । ठवणारासिप्पमाणेहिं ॥ २९ ॥ गोलाण लक्खमिक्कं । गोले गोले निगोअलक्खं तु ॥ इक्किक्के य निगोए । जीवाण लक्खमिक्किक्क ॥ ३० ॥ कोडिसयमेगजीव—प्पएसमाणं तमेव लोगस्स ॥ गोलनिगोअजियाणं । दस उ सहस्सा समोगाहो ॥ ३१ ॥ जीवस्सिक्किक्कस्स य । दससहसावगाहिणो लोए ॥ इक्किक्कंमि पएसे । पएसलक्खं समोगाढं ॥ ३२ ॥ जीवसहस्स जहन्ने । पयंमि कोडीजियप्पएसाणं ॥ उंगाढा उक्कोसे । पयंमि वुत्तं समासेणं ॥ ३३ ॥ कोडिसहस्स जियाणं । कोडाकोडीजियप्पएसाणं ॥ उक्कोसे उंगाढा । सव्वजिया वित्तिया चेव ॥ ३४ ॥ कोडि उक्कोसपयंमि । बायरजीवप्पएसपक्केवो ॥ सोहणइमित्तियं चिय । कायव्वं खंधगोलाणं ॥ ३५ ॥ व्याख्या—उत्कृष्टपदे सूक्ष्मजीवप्रदेशराशेरुपरि कोटीप्रमाणो बादरजीवप्रदेशानां प्रक्षेपः कार्यः, शतकल्पत्वाद्धिवर्द्धितसूक्ष्मगोलकावगाढबादरजीवानां च तेषां

च प्रत्येकं प्रदेशब्रह्मस्योत्कृष्टपदेऽवस्थितत्वात्, तन्मीलने च कोटीसद्भावादिति. तथा सर्वजीवराशेर्भव्यान्योनकमपनयनं ' इत्ति यं चत्ति ' एतावतैव कोटीसंख्यानां वाच्यं, खंभगोलानां खंभगोलकपूर्णताकरणे नियुक्तजीवानां तेषामसद्भाविकत्वादिति ॥ ३५ ॥

॥ मूलम् ॥—एएसिं जहासंभव—मणोवणयं करिज्ज रासीणं ॥ सप्पावउं अ जाणिज्जा । ते अणंता असंखा वा ॥ ३६ ॥ व्याख्या—इहार्थोपनयो यथास्थानं दर्शित एव, ' अणंत्तत्ति ' निगादे जीवा यद्यपि लक्ष्यमानास्तथाप्यनंताः, एवं सर्वजीवा अपि तथा निगोदादयो ये लक्ष्यमानास्तेऽप्यसंख्येया अवसेयाः. इति सूक्ष्मबादरनिगोदगोलकावगाहनाविचारः सूक्ष्मधियगम्यः श्रीरत्नसिंहसूरिकृतः (नितरामतिशयेन गः दुःखं ददातीति निगोदाः) ॥ इति निगोदषट्त्रिंशिकावृत्तिः समाप्ता. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजयसुप्रसादात् ॥

आ ग्रंथ श्रीजामनगरनिवासी पंडित श्रावक हीरालाल हंसराजे स्वपरना श्रेयमाटे पोताना श्रीजैनज्ञानस्करोदय छापखानामां छापी प्रसिद्ध कर्यो छे. ॥ श्रीरस्तु ॥

॥ इति श्रीनिगोदषट्त्रिंशिकावृत्तिः समाप्ता ॥